## न सञ्ज्ञायाम्। (१५५/८९३)

सञ्ज्ञायां विषये बहुव्रीहौ समासे कप् प्रत्ययो न भवति । पूर्वेण प्राप्तः प्रतिषिध्यते । विश्वे देवा [1]अस्य [2]विश्वदेवः । विश्वयशाः ॥

## ईयसश्च। (१५६/८९४)

ईयसन्ताद् बहुव्रीहेः कप् प्रत्ययो न भवति । सर्वा प्राप्तिः प्रतिषिध्यते । बहवः श्रेयांसः अस्य बहुश्रेयान् । 'शेषाद् विभाषा' (५.४.१५४/८९१) इत्यस्य प्रतिषेधः । बह्व्यः श्रेयस्यः अस्य बहुश्रेयसी । 'नद्यृतश्च' (५.४.१५३/८३३) इत्यस्य प्रतिषेधः । ह्रस्वत्वमपि न भवति, ईयसो बहुव्रीहौ पुंवत् इति वचनात् ॥

## वन्दिते भ्रातुः। (१५७/८९५)

वन्दितेऽर्थे यो भ्रातृशब्दो वर्तते तदन्ताद् बहुव्रीहेः कप् प्रत्ययो [3]न भवति । [4]वन्दितः स्तुतः पूजितः इत्युच्यते । शोभनो भ्राता अस्य सुभ्राता[5] । वन्दितः इति किम् ? मूर्खभ्रातृकः । दुष्टभ्रातृकः[6] ॥

## ऋतश्छन्दसि। (१५८/३५०८)

[7]ऋवर्णान्ताद् बहुव्रीहेः छन्दसि विषये कप् प्रत्ययो न भवति । हता माता अस्य हतमाता (अ. वे. २.३२.४) । हतपिता । 'हतस्वसा' (अ. वे. २.६७.३) । 'सुहोता' (ऋ. ७.६७.३)[8] ॥

## नाडीतन्त्र्योः स्वाङ्गे। (१५९/८९६)

स्वाङ्गे यौ नाडीतन्त्रीशब्दौ[9] तदन्ताद् बहुव्रीहेः कप् प्रत्ययो न भवति । बह्व्यः नाड्यः [10]अस्य बहुनाडिः कायः । बहुतन्त्री ग्रीवा । [11]धमनीवचनस्तन्त्रीशब्दः । स्वाङ्गे इति किम् ? बहुनाडीकः स्तम्भः । [12]बहुतन्त्रीका वीणा[13] ॥

## निष्प्रवाणिश्च। (१६०/८९७)

निष्प्रवाणिः इति [14]नदीलक्षणस्य कपः प्रतिषेधो निपात्यते । प्रोयतेऽस्याम् इति प्रवाणी । [15]प्रवयन्ति तया वा इति प्रवाणी । करणसाधनोऽयं ल्युट् । तन्तुवायशलाका भण्यते । निर्गता प्रवाणी अस्य निष्प्रवाणिः पटः । [16]निष्प्रवाणिः कम्बलः । अपनीतशलाकः [17]समाप्तवानः [18]प्रत्यग्रो [19]नवकः उच्यते ॥

इति [20]श्रीवामनविरचितायां [21]काशिकायां वृत्तौ

पञ्चमाध्यायस्य चतुर्थः पादः

---

1. अस्मिन् ड. 2. विश्वेदेवाः ह. 3. न नास्ति क. ह. 4. प्रशस्यमानः इत्यधिकम् ब. क. ड. फ. 5. भ्रातुः इति किम् ? सुमात्रिकः इत्यधिकम् ड. 6. स्थूलभ्रातृकः इत्यधिम् ग. 7. ऋदन्तात् क. फ. ह. 8. छन्दसि इति किम् ? सुहोत्रिकः इत्यधिकम् ड. 9. वर्तेते इत्यधिकम् ब. क. ड. फ. ह. 10. अस्मिन् काये क. 11. नाडीवचनः क. 12. बहुतन्त्रिका फ. 13. स्वाङ्गं परिभाषितं गृह्यते बहुव्रीहौ समासे इत्यधिकम् ड. 14. नदीलक्षणस्य नास्ति क. 15. प्रवयन्ति – भण्यते नास्ति ड. 16. उदाहरणमिदं नास्ति क. 17. समाप्तवाचीकः क, परिसमाप्तत्वात् नवकः उच्यते तत्राचिरादुपहृतः इत्यर्थ इत्यधिकम् ह. 18. प्रत्यग्रः नास्ति क. 19. नूतनः ड. 20. श्रीवामनविरचितायां नास्ति क. 21. काशिकायां नास्ति क.

काशिका–2--240-9.